# अध्याय-४

## ।। ग्रामनगरप्रकाराः ।।

# अध्याय-४

## ।। ग्रामनगरप्रकाराः ।।

मानसशास्त्री एवं पुरातत्त्ववेत्तृणां मतानुसारं समानः विचारः एवं सामूहिकभ्रमणकर्ता मानवानां निवासाः सामूहिकमभवत्। वृक्षशाखानामुपरि एवं शैलाश्रययाणां पश्चात् कृषिक्षेत्रे मानवानां निवासानां प्रारम्भमभवत्। तत्र कृषियोग्यभूमिः तथा जलप्रवाहयोग्यप्लवस्य आवश्यकता अपि आसीत्। प्रारम्भिकः आवासे मानवाः द्वयोरुपरि ध्यानं ददाति स्म। भूविषयकः तथा जल वायु विषयकः। द्वयोः  वनस्पतिः माध्यमः मुख्यासीत्। कालदृष्ट्या मानवाः स्वस्य निवासस्थानार्थं निम्नविषयाणां प्राथमिकतां ददाति स्म। जल, वायुः, भूमि, धरातलः, मृत्तिका, खनीजः, समुद्रतटः तथा वनस्पतिः। तत् कारणात् यदा मानवतायाः सासंकृतिककालः विक्षिप्तं जातं तदा मानवीयावासाः विस्तृतरूपेण मूर्तिमन्तमभवत्। तेषां जनसंख्या, घनत्त्वं, प्रवासः, गृहयोजना  संरचना, उत्पादनं तथा संचारादि कारणात् प्राकृतिकमेवं सास्कृंतिकं भू-दृश्यानां क्षेत्रियसम्बन्धाः दृश्यमानमभवत्। नगरस्य विकासः एतत् प्राकृतिकं विकासक्रेण अवलोकितं शक्यते। एतत् चिन्तनीयमस्ति यत् पृथ्वीतलस्योपरि ये मानवीयतथ्यस्य उपलब्धमस्ति ते एकमावासतः सम्पूर्णं सामूहिकं (ग्रमं वा नगरं) आवासानां पर्याप्तं प्रकाशयन्ति। **'ह्युमन जीयोग्राफी'** ग्रन्थे जीन ब्रुन्स महोदयः मानव भूगोलस्य सास्कृंतिकमाधाराः प्रकाशयित्वा पृथ्व्याः उपयोगस्य सम्बन्धितविषयान्तर्गतं ग्रामनगररादीनां सम्मिलितं करोति। एतेषु विषयेषु गृहाणां प्रकाराणां तथा लघुमार्गतः राजमार्गपर्यन्तमादीनां परिगणितं वर्तते।[१]

---

[1] सांस्कृतिक भूगोल, अ.४, पृ-४८

भूगोलशास्त्रीनां दृष्ट्या मानवः एकः क्रियाशीलः प्राणी अस्ति तथा पर्यावरणं परीवर्तनशीलमस्ति अस्ति। यदा सः परिर्वतनं न कर्तुं शक्यते तदा सः पर्यावरणे समायोजनं स्थापयति। ज्ञातव्यमस्ति यत् वातावरणमेवं मानवः एतत् विस्तृत पर्यावरणे परिवर्तनं कर्तुं शक्नुवन्ति।[२] मानवः भौगोलिकं पर्यावरणे, संक्रियात्मक पर्यावरणे, बौधात्मक पर्यावरणे एवं, व्यवहारात्मकपर्यावरणे निवासः करोति। अथवा यः कथयितुं शक्यते यत् एतत् पर्यावरणे मानवस्य जगतः अस्ति तथा तेषां सः कोऽपि गतिविधि–कार्यं करोति। योग्य ज्ञानमेवं तस्य समुचित उपयोगेन नूतनं पर्यावरणस्य निर्माणं मानवाः कर्तुं शक्नुवन्ति।

मनुष्याणाम् आवासस्थानयुक्तस्य जनपदस्य भौगोलिकमेकं **नगरम् वा पुरमिति** कथ्यते। नगरनिर्माणार्थं भू–परिग्रहणं पश्चात् नगरनिर्माणे केन प्रकारस्य भवनानाम् आवश्यकता अस्ति, तत् विषये चिन्तनं कृत्वा नगरनिर्माणान्तर्गतमावश्यकं वस्तूनां स्थापनमेवं निर्माणं कुत्र कुत्र करणीयमिति निर्णयं करणीयम्। समराङ्गणसूत्रधारग्रन्थानुसारं नगरनिर्माणम् –

**चतुःषष्टिपदाख्येन पुरं सर्वं प्रकल्पयेत्।**[३]

सर्वप्रकारस्य नगरस्य विन्यासं चतुःषष्टिः वास्तुपदमण्डलाधारेण करणीयम्। नगरं मानव सभ्यतायाः महत्त्वपूर्णमङ्गमस्ति। कस्यचित् विदुषः मते पुर तथा नगरं भिन्नमस्ति, तेषां मतानुसारं यत्र नैक ग्रामाणां व्यवहारस्थानमस्ति तन्नाम पुरं वा पुरसमूहः एव नगरमस्ति।[४] स्थापत्यशास्त्रं तथा कोशग्रन्थानुसारं पुरं तथा नगरं पर्यायः अस्ति। पुरः एवं नगरम् अर्थात् मनुष्याणां बृहद् – सामूहिकमावासस्थानानि। नगरं ग्रामात् बृहदमस्ति। अनेक ग्रामाणां जानानां

---

[2] सांस्कृतिक भूगोल, अ.४, पृ–४९

[3] समराङ्गणसूत्रधारः, अ.१०.४

[4] हिन्दी विश्वकोश, भा.११,पृ–३३६

व्यवहारार्थमत्र आगमनं भवति। यत्र नैकवर्णानां जनाः तथा भिन्न-भिन्न कर्मोपजीविजनाः निवसन्ति।[५]

अमरकोशग्रन्थे पुरवर्गे पुरस्य वा नगरस्य सप्त नामानि दर्शितानि। यथा हि-

(१) पूरी (२) नगरी (३) पत्तनम् (४)पट्टनम् (५) पुटभेदनम् (६)स्थानीयं तथा (७) निगमः।[६]

अन्यकोशग्रन्थेषु अपि पत्तनं, पुटभेदनं, स्थानीयं तथा निगमादिनामुल्लेखं पुर एवं नगररूपेण विद्यते।[७] अमरकोशस्य भाष्यकारस्य मतानुसारं कश्चिद् विद्वद्जनानुसारं यत्र शिल्पी एवं व्यावसायिकानां व्यवहारः

भवति एतत् पुरं वा नगरमिति। यत्र राज्ञः एवं राजसेवकाः निवासं कुर्वन्ति एतत् पत्तनं ज्ञायते, यदा एतत् प्राकारादीनां परिवेष्टितमस्ति एवं विस्तिर्णमपि अस्ति एतत् स्थानीय नगरं कथ्यते।[८]

कौटिलीये अर्थशास्त्रे-

**अष्टशतग्राम्या मध्ये स्थानीयम्।**[९]

कामसूत्रे अपि यथा हि –

---

[5] हिन्दी विश्वकोश, भा.११,पृ-३३६

[6] अमरकोशः, काण्ड-२,वर्ग-२, पृ-७७

[7] हिन्दी विश्वकोशः, भा.-१, पृ-३३६,भा.-१३, पृ-६३७,हिन्दी शब्दसागर, पृ-२५१७,संस्कृत हिन्दी कोश(आप्टे), पृ-६२२

[8] अमरकोशः, काण्ड-२,वर्ग-२,पृ-७७

[9] कौटिलीय अर्थशास्त्रम्, (वाचस्पति गैरोला), अधिकरण-२,अ.१,पृ-९३

**नगरमष्टाशतग्रामीमध्ये तद्व्वहारस्थानम्।**[१०]

एतत् जनपदस्य प्रधानमधिष्ठानमासित् तथा एतादृशां नगरमासीत् तत्र अष्टशतं (८००) ग्रामैः जनाः आगत्वा स्वस्य व्यवहाराः सम्पादितं कुर्वन्ति स्म। वस्तुतः उपर्युक्तं पत्तनं, पुरी, नगरं, स्थानीयं, पुटभेदनं, निगमादि सर्वाणि पुरस्य पर्यायनामानि सन्ति। एतानि सर्वाणि स्वस्य उत्पत्तिः, विकासः एवं इतिहासस्योपरि समग्ररूपेण प्रकाशितं कुर्वन्ति। समराङ्गणसूत्रधारग्रन्थानुारं नगरस्य पर्यायनामानि निम्नदर्शितरुपेण दर्शितमस्ति। यथा हि

**नगरं मन्दिरं दुर्गं पुष्करं साम्परायिकम्।**

**निवासः सदनं सद्म क्षयः क्षितिलयस्तथा।।**[११]

एषः श्लोके स्पष्टं भवति।

प्राचीनकालादारभ्य मानवः स्वस्य आवासः, भोजनं तथा जीवनयापनस्य आवश्यकीयानि साधनानि तदुपरान्तम् आत्मसुरक्षायाः उपायानां विष्म्स्योपरि विचार–चिन्तनं करोति स्म। तदर्थस्य साधनानि उपयुक्तानि अपि कृतवान्। तेन सह मानवोत्थाने शासनमेवं प्रभुत्वस्य महत्त्वपूर्णं योगदानमासीत्। अतः सम्यक्रूपेण शासनस्य सञ्चालनाय वैंषाञ्चित् ग्रामाणां मध्ये रक्षाकेन्द्ररूपेण दुर्गविशेषस्य स्थापनमपि क्रियते स्म। एतत् परम्परानुसारं प्रायः सर्व वास्तुशास्त्रग्रन्थेषु नगरनिवेशस्य एवं ग्रामनिवेशस्य निर्धारिताः नियमाः प्राप्यन्ते। तेषां प्रायः दुर्गनिवेशस्य नियमाः अपि दर्शिताः सन्ति। डॉ. पी.के. आचार्यवर्यान् मतानुसारं मानसारग्रन्थे पुरस्य, नगरस्य, ग्रामस्य तथा दुर्गनिवेशस्य नियमाः प्रायः समानाः सन्ति। तथोक्तम्– मानसारग्रन्थानुसारं ग्रामे, नगरे तथा दुर्गे विशेषं भेदः नास्ति। सर्वाणि सुरक्षितानि जनावासोचितानि स्थानानि सन्ति। नगरस्य ग्रामस्य विस्तृतं रूपमस्ति। दुर्गमपि प्रायः सुरक्षितं

---

[10] कामसूत्रम् , अ.४.२ (जयमङ्गला) नगरवृत्त प्रकरणम् ,

[11] समराङ्गणसूत्रधारः, अ.१८.१

नगरसदृशमस्ति। यत्र दुर्गस्य रक्षार्थं निर्माणं भवति तत्र ग्रामस्य वा नगरस्य निर्माणम् आवासहेतु भवति।[१२] परन्तु यत् नगरस्य निर्माणं वा विकासः राज्याश्रयेण न किन्तु धर्माश्रयः, व्यवसायार्थं वा व्यापारादि हेतव भवति तत्र दुर्गस्य परम्परा गौणरूपेण दृश्यते।

नगराणां, ग्रामाणां प्रसारस्य विशेषरूपेण तेषां भवनानां निर्माणार्थं भूमिः एवं सञ्चरण–व्यवस्थायाः विकासस्य नियोजनं हेतु सामायिक गतिविध्यां नगरनियोजनमिति कथ्यते।[१३] स्थापत्यशास्त्रानुसारं नगरनिवेशस्यान्तर्गतं पत्तनं, पुटभेदनं, स्थानीयं, निगमं, खेटं, ग्रामं, दुर्गः इत्यादीनां विस्तृतं क्षेत्रं सम्मिलितमस्ति। अतः सैद्धान्तिकरूपेण वप्रः, प्राकारः, परिखा, राजमार्गः आदि नगरस्य आवश्यकानि अङ्गानि सन्ति एतेषां विषयाणां निर्माणविषयकं वर्णनं प्राप्यते। अश्वघोषस्य सोन्दरानन्देऽपि एतावत् नगरसम्बन्धितमेवं राजप्रासादस्य विवरणं प्राप्यते। यथा हि –

**सरिद्विस्तीर्णपरिखं स्यष्टाञ्चतमहापथं शैलकल्पमहावप्रंगिरिव्रजमिवापरं।**

**पाण्डुराट्टालसुमुखं सुविभक्तान्तरापणं हर्म्यमाला परिक्षितम्।**[१४]

## १.नगरभेदाः –

समराङ्गसूत्रधारग्रन्थे राजा भोजः विस्तार दृष्ट्या नगरस्य मुख्याः त्रयः भेदाः दर्शयति। तथा हि–

**पुरस्य त्रिविधस्यापि ............।**[१५]

---

[12] इन्डियन आर्किटेक्चर एकोर्डिगं टु मानसारशिल्पशास्त्र,

[13] हिन्दी विश्वकोश, खण्ड–७,पृ–२४३

[14] सौन्दरानन्द, १.४२–४३

[15] समराङ्गसूत्रधारः, अ.१०.१

ज्येष्ठनगरम्, मध्यमनगरम् तथा कनिष्ठनगरम्। एतेषां नगराणां प्रमाणमपि प्रोक्तम् –

**ज्येष्ठं तत्र चतुश्चापसहस्त्रं पुरमिष्यते।**

**मध्यं द्वाभ्यां सहस्त्राभ्यामेकेन व्यासतोऽधमम्।।**[१६]

ज्येष्ठनगरस्य प्रमाणं ४००० चाप व्यासमानेन, मध्यमनगरस्य मानं २०००चाप व्यासमानेन तथा कनिष्ठनगरस्य प्रमाणं १०००चाप व्यासमानेन करणीयम्। तथा तेषां विस्तार: निम्नोक्तम् –

**साष्टमांशं सपादं वा सार्धं वा व्यासमायतम्।**

**कुर्यादेकैकमायामं चतुरश्रीकृतं शुभम्।।**[१७]

त्रयाणां नगराणां विस्तार: क्रमश: निम्नदर्शितरूपेण भवति । यथा हि–

ज्येष्ठनगरम् – ४००० ८ ५०० चाप

मध्यमनगरम् – २००० ४ ५०० चाप

कनिष्ठनगरम् – १००० २ ५०० चाप

तदुपरान्त राजधानीवर्गीयं नगरं तथा शाखानगरस्य रूपेण पत्तनं, पुटभेदनं, निगमं, खेटं, कर्वटं, ग्रामं, पल्ली, पल्लिका, गोष्ठ, गोष्ठक इत्यादीनां क्रमश: उल्लेखो वर्तते।

वास्तुरत्नावल्यामऽपि नगराणां विस्तारप्रमाणेन उत्तमादि नगरभेदा: वर्णितं वर्तते। यथा हि–

**वक्ष्येऽथो विवधं पुरं मुनिमतं मध्योत्तमं कन्वसं**

**तेषां हस्तसहस्त्रमन्तिमपुर मध्यं तत: सार्धकम्।**

---

[16]समराङ्गसूत्रधार:, अ.१०.२

[17] समराङ्गसूत्रधार:, अ.१०.३

**ज्येष्ठं युग्मसहस्त्रमेषु चरमं भागाष्टकेनान्वितं**

**मध्यं द्वादशभागतः शशिकलं ज्येष्ठं विदध्यात्सुधीः।।**[१८]

अथ मध्यमोत्तमं कनिष्ठमिति मुनभिः त्रिविधं नगरं प्रोक्तम्। तेषां त्रयाणां नगराणां मध्ये अन्तिमं कनिष्ठं नगरं सहस्त्रहस्त(१०००) प्रमाणतः भागाष्टकेनान्वितं यावत् अर्थात् १०००हस्ततः ११२५हस्तपर्यन्तम्, तथा ततः सार्धकं प्रमाणेन अर्थात् सार्धसहस्त्रहस्त (१५००) प्रमाणतः द्वादशभागतः द्वादशभागाधिकमर्थात् १६२५ हस्तपर्यन्तं भवति। ज्येष्ठमुत्तमं नगरं युग्मसहस्त्रहस्त(२०००) प्रमाणतः षोडशभागाधिकमर्थात् २१२५ हस्त पर्यन्तं निर्मापनीयम्।

मनुष्यालयचन्द्रिकायामपि मानानुसारेण नगरस्य व्याख्यां दृश्यते। यथा हि –

**नगरस्य सहस्त्रादि द्विसहस्त्रान्तं च दण्डमानं स्यात्।**[१९]

विश्वकर्मवास्तुशास्त्रम् इति ग्रन्थेऽपि यथोक्तं सप्तविधनगरलक्षणं प्रस्तौति –

**आद्यस्तु निगमः प्रोक्तस्कन्धावारो द्वितियकः।**

**द्रोणकस्तु तृतीयस्याच्चतुर्थः कुब्जको मतः।।**

**पट्टनं पञ्चमं षष्ठशिशिबिरस्तु प्रकीर्तितः।**

**..............चारस्सप्तमो वाहिनीमुखः।।**[२०]

तत्र प्राथमिको निगमः, द्वितीयस्स्कन्धावारनामकः, द्रोणकस्तृतीयः, कुब्जकश्चतुर्थः, पञ्चमः पट्टणनामभाक्, षष्टः शिबिरनामा, सप्तमस्तु वाहिनीमुख इति सप्तविधो नगरभेदः। एताः नगरभेदाः राजाद्वारा सेवन–योग्याः सन्ति। एवं सप्तविधभेदत्वेन प्रतिपादिता इमे

---

[18]वास्तुरत्नावली, अ.९.१४८

[19] मनुष्यालयचन्द्रिका, अ.३.१७

[20] विश्वकर्मवास्तुशास्त्रम्, अ.८.३८–३९

नगरादयो न ग्रामलक्षणेषु निवेशनीया, नापि पद्ममुखादिमहानगरलक्षणेषु। तस्मादिदं पृथक्त्वेन निगमादिलक्षणमेवं प्रतिपादितं ज्ञेयम्। तदरिक्तमन्य विशंति:(२०) प्रकाराणां नगरणां वर्णनमपि प्राप्यते। यथा–

**पद्मकस्सर्वतोभद्रो विश्वेशपूर्वक:।।**

**श्रीप्रतिष्ठा च नगरी बलिदेव: पुरन्तथा।**

**देवमानुषभेदेन द्विविधं नगरं मतम्।।**

**वैजयन्तश्च नगरमन्यञ्च पुटभेदनम्।**

**गिरिवारिगुहाभेदान्नगरं तत्त्रिधा मतम्।।**

**मुखाष्टकञ्च नगरं नन्द्यावर्तमथोत्तरम्।**

**प्रसिद्धा राजधानी च कीर्तिता नगरोत्तमा।**

**लोकानन्दकरास्सर्वे यशस्सम्पद्विवृद्धिदा:।।**[२१]

पद्मादिनगरलक्षणं प्रतिपादयितुम् आदौ तेषां नामानि शास्त्रकार: विश्वकर्मण: बोध्यति। (१) पद्मकनगरम् (२) सर्वतोभद्रनगरम् (३) विश्वेशभद्रनगरम् (४) कार्मुकनगरम् (५) प्रस्तरनगरम् (६) स्वस्तिकनगरम् (७) चतुर्मुखनगरम् (८) श्रीप्रतिष्ठनगरम् (९) बलिदेवनगरम् (१०)पुरम् (११) देवनगरम् (१२) मानुषनगरम् (१३) वैजयन्तनगरम् (१४) पुटभेदननगरम् (१५) गिरिनगरम् (१६) जलनगरम् (१७) गुहानगरम् (१८) अष्टमुखनगरम् (१९) नन्द्यावर्तनगरम् (२०) राजधानीनगरमित्येवं नाम्ना प्रसिद्धानि पद्मादिनगराण्युत्तमानि विंशतिसंख्यकानि कथितानि पूर्वैस्सर्वेषां जीवनामानन्दकराणि यशसां सम्पदाश्च वर्धनशीलानि जायन्ते।

---

[21] विश्वकर्मवास्तुशास्त्रम्, अ.८.१–४

राजवल्लभग्रन्थेऽपि एतावत् विंशतिप्रकाराणां नगराणां वर्णनं दृश्यते। तत्र केचन नामभेदाः प्रवर्तन्ते। यथा हि –

**माहेन्द्रं चतुरस्त्रमायतिपुरं तत् सर्वतोभद्रकं**

**वृत्तंसिंहविलोकनं निगदितं वृत्तायतं वारुणम्।**

**नंदाख्यं च विमुक्तकोणमथनंदावर्त्तकं स्वस्तिका**

**कारंस्याद्यववज्जयंतमपितद्दिव्यं गिरेर्मस्तके।।**

**पुष्पं चाष्टदलोपमं च पुरुषाकारं पुरं पौरुष**

**स्नाहंकुक्षिषुभूधरस्यकथितंदंडाभिधंदैर्घ्यकम्।**

**शक्रंप्राक्सरितः परत्रकमलंयाम्येनदीधार्मिकं**

**द्वाभ्यांचैवमहाजयं च धनदाशायांनदीसौम्यकम्।।**

**प्राकारैकयुतंश्रियाख्यनगरं द्वाभ्यांरिपुघ्नंपुरं**

**त्वष्टाश्रंकथयंतिस्वस्तिकमितिप्रोक्तागुणाविंशतिः।**[२२]

सूत्रधारमण्डनः स्वस्य राजवल्लभग्रन्थे उल्लेखं करोति। (१) चतुरस्त्राकारनगरं माहेन्द्रम् (२) आयताकारनगरं सर्वतोभद्रम् (३) वृत्ताकारनगरं सिंहविलोकनम् (४) लम्बवृत्ताकारंनगरं वारुणम् (५) विमुक्तकोणं नगरम् (६) स्वस्तिकारनगरं नन्दावर्त्तकम् (७) यवाकारनगरं जयन्तम् (८) पर्वतस्य मस्तके स्थितं नगरं दिव्यम् (९) अष्टदलाकारनगरं पुष्पपुरम् (१०) पुरुषाकारं पुरं पौरुषम् (११) गिरिकुक्षे स्नाहम् (१२) दण्डाकारनगरं दण्डम् (१३) प्राक्सरितः शक्रपुरम् (१४) नद्याः पश्चिमे कमलपुरम् (१५) नद्याः याम्ये धार्मिकपुरम् (१६) नगरस्य द्वयोपार्श्वे सरिता स्थिताः तदा महाजयनगरम् (१७)

---

[22] राजवल्लभः, अ.४.४–६

नद्याः उत्तरे सौम्यम् (१८) प्राकारैकयुक्तं श्रीनगरम् (१९) द्वाभ्यां प्राकारयुक्तं रिपुघ्नम् (२०) अष्टाश्रं युक्तं नगरं स्वस्तिकनगरमिति प्रख्यातम्।

अपराजितपृच्छाग्रन्थेऽपि यथोक्तं –

**वक्ष्ये पुरस्य चाकारं साम्प्रतं लक्षणं पुनः।**

**प्रशस्तं दोषरहितं पुरनामानि विंशतिः।।**

**माहेन्द्रं सर्वतोभद्रं सिहावलोकवारुणे।**

**नन्द्यावर्त च नन्दाख्यं पुष्पकं चैव स्वस्तिकम्।।**

**पार्श्वदण्डं जयन्तं च श्रीपुरं रिपुमर्दनम्।**

**स्नाहं दिव्यमुत्तरं च धर्मं कमलशक्रदे।।**

**महाजयं पौरुषं च साम्प्रतं कथितं बुधैः।**

**पुराणां विंशतिश्चैव ख्याता भुवनमण्डनम्।।**[२३]

उपर्युक्तानां सर्वेषां नगराणाम् आकृतिः एवं विशेषता भिन्ना भिन्ना अस्ति। अपराजितपृच्छायामपि राजवल्लभः एव –

**माहेन्द्रं चतुरश्रं च प्रतापकीर्तिविवर्धनम्।**[२४]

राजाभोजः युक्तिकल्पतरुग्रन्थे एतत् नगरं श्रेष्ठं गण्यते। यथा हि –

**चतुरश्रं चतुर्वर्गफलाय पृथिवीपतेः।**[२५]

मस्त्यपुराणेऽपि चतुरश्रं नगरं शुभाकृतिः मन्यते।[२६]

---

[23] अपराजितपृच्छा, ७३.१–४

[24] अपराजितपृच्छा, ७३.११

[25] युक्तिकल्पतरु, नगरयुक्ति, १४७

तथा ब्रह्माण्डपुराणेऽपि यथोक्तं –

**चतुरस्त्रं दिव्यं प्रशस्तं तैः पुरं कृतम्।**

सर्वतोभद्र संज्ञकं नगरम् आयताकारे भवति। आयताकारनगरणां विषयकवर्णनं रामायणे **अयोध्यानगरस्य**[२७] तथा महाभारते **द्वारकानगरस्य** [२८] वर्णने नगराणामाकारः आयताकारः दर्शितः। अपराजितपृच्छाकारस्य मतानुसारं एतस्य आयताकारस्य फलम् –

**वृद्धिदं सर्वतोभद्रं नित्यं तद्भद्रशान्तिदम्।।**[२९]

मस्त्यपुराणेऽपि –

**आयतं ............काच्येत् पुरम्।।**[३०]

अर्थात् नगरनिवासिनां कृते मङ्गलदायकं भवति। तथा सिंहावलोकननगरस्योल्लेखो अपि मस्त्यपुराणे प्राप्यते। अपराजितपृच्छायामपि **सिंहावलोकनं वृत्तम् ..........।** [३१] तथा **वृत्तयतं च वारुणम्।**[३२] तथा तत्र निवासितानां **वारुणे तु प्रजावृद्धिः।**[३३]

---

[26] मस्त्यपुराणम् , अ.२१७.१

[27] वाल्मीकिरामायणम् , बालकाण्ड, सर्ग–५.७

[28] महाभारत, सभापर्व, परिशिष्ट–२, पृ–४१५

[29] अपराजितपृच्छा, ७३.११

[30] मस्त्यपुराणम् , २१७.१२

[31] अपराजितपृच्छा, ७३.५

[32] अपराजितपृच्छा, ७३.५

[33] अपराजितपृच्छा, ७३.१२

मानसारग्रन्थानुसारम् –

**नगरं राजधानीयं केवलं नगरं तथा।।**

**पुरं च नगरी चैव खेट(टं) खर्वटमेव च।**

**कुब्जकं पत्तनं चैव शिविरं वाहिनीमुखम्।।**

**स्थानीयं द्रोणकं चैव संविद्धिं कोलकं ततः।**

**निगमं स्कन्धावारं च दुर्गं भवेत्।** [३४]

उपरोक्त श्लोके नगरस्य प्रकाराः मानऋषीः दर्शयति।

तथा यथोक्तं मयमतम् इति ग्रन्थानुसारमपि नगरभेदानन्तर्गतं राजधानी, नगरं, पुरं, नगरी, खेटः, खर्वटः,कुब्जकः, पत्तनं, शिविरं, वाहिनिमुखं, स्थानीयं, द्रोणकः, कोत्मकोलकं (कोलक), विडम्ब, निगम, स्कन्धवार, दुर्गः आदीनां वर्णनं प्राप्यते। [३५]

विश्वकर्मवास्तुशास्त्रम् इति ग्रन्थे अन्य द्वादशग्रामाणां लक्षणानां वर्णनमपि लभ्यते। यथा हि–

**आद्यस्तु मण्डकग्रामः प्रस्तरस्तदनन्तरम्।**

**बाहुलीकस्तृतीयस्तु पराकस्तु चतुर्थकः।।**

**चतुर्मुखः पञ्चमः स्यात् षष्ठः पूर्वमुखस्तथा।**

**सप्तमो मङ्गलग्रामस्त्वष्टमो विश्वकर्मकः।।**

**नवमो देवराड्ग्रामो विश्वेशो दशमो मतः।**

**एकादशस्तु कैलासो द्वादशो नित्यमङ्गलः।।**

**इत्येवं द्वादश ग्रामाः शिल्पशास्त्रे प्रकीर्तिताः।** [३६]

---

[34] मानसार, अ.१०.१९–२१

[35] मयमतम्, अ.१०

यथा (१) मण्डकग्रामः, (२) प्रस्तरग्रामः, (३) बाहुलिकग्रामः, (४) पराकग्रामः, (५) चतुर्मुखग्रामः, (६) पूर्वमुखग्रामः, (७) मङ्गलग्रामः, (८) विश्वकर्मग्रामः, (९) देवेशग्रामः, (१०) विश्वेशग्रामः, (११) कैलासग्रामः, (१२) नित्यमङ्गलग्रामः, इति द्वादशग्रामाणां लक्षणमपि विस्तृतरुपेण प्रतिपादितमस्ति।

**►नगरम् –**

**नग इव प्रसादाः सन्त्यत्र** व्युत्पत्यानुसारं यत्र भवनानां भित्तिः तथा छदिः विशेषतः पाषाणैः वा पक्वेष्टिकैः निर्मितैः तन्नगरमिति कथितुं शक्यते। परन्तु वास्तुशास्त्रीय ग्रन्थेषु नगरस्य परिभाषा भिन्नरूपेण वर्णितं वर्तते।

मानसारग्रन्थानुसारं नगरस्य चर्तुदिक् गोपुरयुक्तानि चत्वारि द्वाराणि तथा रक्षागृहमेवं सैन्यावासः स्थितः भवति। एतत् स्थानं वणिजां तथा देवालयादीनां युक्तमस्ति।[३७] तथा मनुष्यालयचन्द्रिकायां नगरस्य स्वरूपं निम्नोक्तरूपेण वर्तते। यथा हि -

**पुरमिति नरवरभवनप्रधानमाहुर्वणिग्जनादियुतम्।**

**नगरं राजवरालयसकलजनागारमण्डितं विदितम्।।**[३८]

मयमतम् ग्रन्थानुसारं नगरस्य व्याख्या निम्नदर्शितरुपेण अस्ति। यथा हि –

**दिक्षु चतुर्द्वारं गोपुरयुक्तं तु सालाद्वयम्।**

**क्रयविक्रयकैर्युक्तं सर्वजनावाससङ्कीर्णम्।।**

**सर्वसुरालयसहितं नगरमिदं केवलं प्रोक्तम्।**[३९]

---

[36] विश्वकर्मवास्तुशास्त्रम् , अ.७.६–९

[37] मानसार, अ.१०.२४–२६

[38] मनुष्यालयचन्द्रिका, अ.३.१८

मयमतग्रन्थेऽपि मानसारेव चतुर्दिक्षु चतुर्द्वार तथा द्वारोपरि शालायुक्तं गोपुरं निर्मितव्यमीति दर्शितम्। क्रय–विक्रय हेतुः स्थानम् अर्थात् आपण–विपणमस्ति, तथा सर्ववर्णानां जनाः तत्र निवासं कुर्वन्ति। तदरिक्तं अत्र सर्वदेवानां प्रसादाः अपि सन्ति। अनेन वास्तुशास्त्रीयदृष्ट्या नगरस्य चतुर्दिक्षु पृथक् –पृथक् दिशायां द्वाराणि गोपुरैः परिवेष्टितं निर्मितव्यमिति। नगरे सर्वदिक् नागरिकाणामावासीयभवनानि तथा अन्य आवश्यकीय प्रयोजनीयभवनानां विन्यासः पृथक् – पृथक् सम्यक्रूपेण करणीयम्। अत्र विभिन्न देवतायतनां स्थापनामपि निश्चितमनिवार्यरूपेण कर्तव्यम्। प्राचीना एवमर्वाचीना भारतीयपरम्परानुसारं नगरं वाणिज्यमेवं व्यापारिकं केन्द्रं मन्यते तथा समीपस्थ ग्राम–समूहानां मुख्यालयमपि मन्यते, अत्र जीवनापयनस्य अनेक आवश्यकतानां पूर्तिः अपि भवति। अतः यातायात–सुविधायाः तथा विभिन्नप्रकाराणां वस्तूनां क्रयः विक्रयः आदीनां हेतुः नियतस्थानमपि निर्मितव्यम्।

**►राजधानी -**

कस्यापि देशस्य वा राज्यस्य समुन्नतस्य विकासशीलस्य नगरस्य चयनं राजधानीनगररूपेण क्रियते। देशस्य वा राज्यस्य एतत् नगरे सर्वाधिकं जनसन्निवेशः भवति स्म। कारणं राजधान्यां राजप्रासादः वा शासन–पीठः विद्यमानः अस्ति। भारतीयस्थापत्येषु तथा अन्य प्राचीन ग्रन्थेषु राजधानी शब्दस्य प्रयोगः राजनस्य प्रधाननगरमिति इत्यर्थं भवति। समराङ्गणसूत्रधारग्रन्थे एतत् स्पष्टं भवति। यथा हि –

**यत्रास्ते नगरे राजा राजधानीं तु विदुः।**[४०]

---

[39] मयमतम् ,अ.१०.२०–२१

[40] समराङ्गणसूत्रधारः (पूष्पेन्द्र), अ.१८.२

उपरोक्तश्लोकेन स्पष्टं भवति। तथा मयमतग्रन्थेऽपि राजधान्याः परिभाषा समानमेव दृश्यते। यथा –

**या नृपवेश्मसमेता सा कथिता राजधानीति।**[४१]

यत्र राजप्रासादः अस्ति, एतत् नगरं राजधानी। महाकविः कालिदासः रघुवंशे इक्ष्वाकुणां राज्ञां नगरम् – **अयोध्यायमनुराजधानीम् ।**[४२] इति कथितम्। एतावत् विक्रमाङ्कदेवचरितग्रन्थेऽपि – **राजधानीमयोद्याम्।**[४३] एतेन स्पष्टं भवति यत् प्राचीनकाले राजधान्याः अभिप्रायः **राज्ञानां प्रमुखमधिष्ठानम्** इति कथितुं शक्यते। वर्तमाने अपि इत्थं परम्परा वर्तते।

मयमतम् ग्रन्थानुसारम् –

**राष्ट्रस्य मध्यभागे सज्जनबहुले नदीसमीपे च।**

**..................राजगृहोपेतराजधानी वा।।**[४४]

राजधान्याः सन्निवेशः सज्जनबहुल राष्ट्रस्य मध्यभागे वा नदी समीपस्थं करणीयम्। तथा–

**परितः परिखा बाह्यं शिबिरयुतानेकमुखरक्षा।**

**पूर्वायां दक्षिणतश्चाभिमुखा राजवलयुक्ता।।**

**उन्नतगोपुरयुक्ता नानाविधमालिकोपेता।**

**सर्वसुरालयासहिता नानागणिकान्विता बहूद्याना।।**

---

41 मयमतम् , अ.१०.२५

42 रधुवंशम् , सर्ग.१३.६१

43 विक्रमाङ्कदेवचरितम् , सर्ग.१८.९४

44 मयमतम्, अ.१०.१९

**हस्त्यश्वरथपदातिबहुमुखा सर्वजनयुक्ता।**

**द्वारोपद्वारयुताभ्यन्तरतोऽनेकजनवासा।।**[४५]

एतादृशं नगरं परितो परिखा– प्राकार द्वारा परिवेष्टितमस्ति। तस्य सुरक्षार्थं नगरद्वारस्य पुरतः सैनिकशिबिरस्य स्थापना अपि करणीया । ततः प्रत्येकः दिशायां दृष्टिः भवति। नगरस्य अन्तः तथा बर्हिः सुरक्षार्थं पूर्वाभिमुखमेवं दक्षिणाभिमुखं सैन्य नियुक्तमपि क्रियते। अत्र बृहद् – बृहद् गोपुराणां निर्माणमपि भवति, तेषां नानाविध मालिका भवति। सर्वसुरालयाः, नानागणिकान्विता तथा तत्र बहूद्यानामपि विद्यमानानि सन्ति। अत्र राजप्रासादेन सह गजाः, अश्वाः, रथाः एवं पदातिसैन्यबलमपि स्थितमस्ति। अत्र सर्वप्रकाराणां जनाः निवासं कुर्वन्ति। एतत् नगरे द्वारमेवमुपद्वारमस्ति। नगरस्य अभ्यन्तरे अनेक जनवासाः सन्ति।

मानसारग्रन्थेऽपि राजधानीनगरसम्बन्धितं प्रदत्तं लक्षणं मयमतानुसारमस्ति। तेषामनुसारम् –

**राष्ट्रमध्ये नदीतीरे बहुपुण्यजनावृतम्।।**

**मध्ये राजयुतं चैव नगरं कृतमिष्यते।**

**तत्रागते नगर्यन्तं यदि विष्णवालयं भवेत्।।**

**राजधानीति तन्नाम विद्वद्भिर्वक्ष्यते सदा।**

**चतुर्दिक्षु चतुर्द्वारं गोपुरैश्च समन्वितम्।।**

**रक्षागृहैः समाकीर्णं विष्वकसेनालयान्वितम्।**

**वाणिग्भिश्च समाकीर्णमापणैश्च समावृतम्।।**[४६]

---

[45]मयमतम्, अ.१०.२२–२४

[46] मानसारः, १०.२ –५

राजधानी संज्ञक नगरस्य सन्निवेशः राष्ट्रस्य मध्ये वा नदीतीरे भवति। अत्र विभिन्नप्रकारस्य जनावासाः सन्ति तथा नगरस्य मध्ये राजभवनं विराजितमस्ति। राजधानी एवमन्य नगरेषु पार्थक्यकारणात् विष्णवालयमपि भवेत् । अत्र चतुर्दिक्षु चतुर्द्वारं गोपुरैः समन्वितं च करणीयम्। एतस्मिन्नगरे सर्वत्र सैन्यबलं आवागमनं कर्तुं शक्यते। अत्र भवनानि, आपणिकाः तथा आपण–विपणैः परिपूरितानि भवन्ति।

शुक्रनीतिग्रन्थेऽपि यथोक्तं राजधान्याः लक्षणानां प्रतिपादनं दृश्यते। यथा हि –

**अर्धचन्द्रां वर्तलां व चतुरश्रां सुशोभनाम्।**

**सप्राकारं सपरिखां ग्रामादिनां निवेशिनाम्।।**

**सभामध्यां कूपवापीतडागादियुतां सदा।**

**चतुर्दिक्षु चतुर्द्वारां सुमार्गारामवीथिकाम्।।**

**दृढसुरालयमठ पान्थशालाविराजिताम्।**

**कल्पयित्वा वसेत् तत्र सुगुप्तः सप्रजो नृपः।।**[४७]

तदनुसारं राजधान्यै चितायाः भूम्याः आकृतिः अर्धचन्द्राकारः, वृत्ताकारः वा समचतुरस्रः शुभः शोभनः मन्यते। राजधानी अत्यन्तं सुन्दरा सुशोभना प्राकार–परिखायाः परिवृत्ता भवेत्। एतस्य आभ्यन्तरिक नगरग्रमादीनां निवेशनं कर्तव्यम्। नगरस्य केन्द्रे सभाभवनं स्थापनियम्। अत्रे वापीकूपतडागादीनां निर्माणमपि करणीयम्। नगरस्य चतुर्दिक्षु प्रमुख चतुर्द्वाराणि स्थापनीयानि। नगरेन सुन्दरः राजमार्गः, वाटिकां, सुदृढ सुशोभितानि मन्दिराणि, मठाः तथा पान्थशाला इत्यादिभिः सुशोभितं करणीयम्।

[47] शुक्रनीति, १.२१५–२१७

भारतीय स्थापत्यग्रन्थेषु राजधान्याः लक्षणानि प्रतिपादितानि सन्ति, एतानि वस्तुतः प्राचीनभारतस्य नैका राजधान्यः विद्यमानाः आसन्। पाटलिपुत्र, कान्यकुब्ज, हस्तिनापुरम्, द्वारका तथा मथुरा आदि नगरेषु प्राकारः, परिखा, गोपुरं, शिबिरं तथा विशालैः प्रसादैः युक्तमासीत्। नगरस्य अन्तः उद्यानं, मन्दिरं, सरांसि तथा राजमार्गः आदि स्थितमासन्।

**► पत्तनम् -**

प्राचीनेषु ग्रन्थेषु पत्तन शब्दप्रयोगः **समुद्री गन्दरगाह** इति अर्थे वर्तते। जैन–साहित्ये एते जलपट्टनमिति कथ्यते। अर्थात् अत्र विदेशीय वस्तूनि आनयन्ति तथा स्वदेशीय वस्तूनां निर्यातं भवति।[४८] अमरकोशे पत्तनस्य व्याख्या – **पतन्त्यत्रपत्तनम्** [४९] अर्थात् पत्तनं एतावत् केन्द्रमस्ति तत्र चतुर्दिशातः वस्तूनि आगच्छन्ति। एतेन स्पष्टं भवति यत् पत्तनमेकं बृहद् वाणिज्य बन्दरगाहं वा समुद्री बन्दरगाहमासीत्। कौटिलीयअर्थशास्त्रेऽपि **पण्यपत्तनम्** इति शब्दप्रयोगः दृश्यते। तस्यार्थः वाचस्पति गैरोला बृहद् –बृहद् विपणम् इति करोति।

समराङ्गणसूत्रधारग्रन्थे पत्तनस्य व्याख्या –

**उपस्थानं भवेद् राज्ञां यत्र तत् पत्तनं विदुः।**[५०]

पत्तनं राज्ञानामुपस्थानमासित् इति। ग्रीष्मकालिकः अथवा शीतकालिकः राजपीठः भवेत्। मनुष्यालयचन्द्रिकाग्रम्थेऽपि पत्तनस्य व्याख्यां प्राप्यते। यथा हि

**पत्तनसञ्ज्ञं तद्वत् पोतान्वितवारि(नि)धितटोपेतम्।।**[५१]

---

48 सार्थवाह, पृ–१६३

49 अमरकोश (सत्यदेव मिश्र सम्पादित), पृ–१२६

50 समराङ्गणसूत्रधारः, अ.१८.५

51 मनुष्यालयचन्द्रिका, अ.३.१७

मानसारानुसारम् –

**अब्धितीरप्रदेशे तु नानाजातिगृहैर्वृतम्।**

**वणिग्जातिभिराकीर्णर्क्रिंयविक्रयपूरितम्।।**

**रत्नैद्वीपान्तरैर्नित्यै (रानीतैः) क्षौमैः कर्पूरकादिभिः।**

**एतत्पत्तनमाख्यातं वप्रायतसमन्वितम्।।**[५२]

समुद्रतटस्योपरि नानाजातिगृहैः युक्तं विशेषरूपेण व्यापारिकाः निवासिताः। तत्र वस्तूनां सदैव क्रयः-विक्रयः भवति तथा विदेशतः आनीताती वस्तूनि रेशमवस्त्राणि एवं कर्पुकादीनि परिपूर्णानि भवेयुः इति पत्तनम्।

अन्यवास्तुशास्त्रीयग्रन्थेषु अपि पत्तनस्य लक्षणमुपलब्धमस्ति। मयमतमानुसारम् –

**द्विपान्तरागतवस्तुभिरभियुक्तं सर्वजनसहितम्।**

**क्रयविक्रयकैर्युक्तं रत्नधनक्षौमगन्ध्वस्त्वाढ्यम्।।**[५३]

अन्यदेशतः आयातवस्तूनां युक्तं तथा सर्वजनसहितं कथितम्। एते नगरे क्रय-विक्रय कर्तराः जनानामाधिक्यं भवेत् तथा रत्नधनक्षौमवस्त्रगन्धद्रव्यादीनां प्राचूर्यं भवेत्। एतत् नगरं समुद्रतटे स्थितमासीत् वा समुद्रेन सम्बन्धितमासीत्।

विश्वकर्मवास्तुशास्त्रम् इति ग्रन्थे पट्टणनगरस्य लक्षणमाह –

**पारावारतटे वापि भूधरोपत्यकातटे।**

**स्वादुतोयस्थले वाऽपि पत्तनङ्कारयेद्बुधः।।**

**महामार्गेण संयुक्तं सर्वतः परिघावृतम्।**

---

[52] मानसारः, १०.३२-३३

[53] मयमतम् , अ.१०.२८-२९

**वीथ्यष्टकसमोपेतभागद्वादशभूषितम्।।**

**एकपादप्रमाणेन स्थलेन नृपमन्दिरम्।**

**मध्येवा दिशि वारुण्यां दुर्गोपेतं प्रकल्पयेत्।।**[५४]

**गोपुरेणसमायुक्तं सभामण्टपभूषितम्।**

**कल्पयेद्दिक्षु सर्वत्र देवतायतनं बहु।।**

**उपवीथीः क्षुद्रवीथीरनेकाश्च प्रकल्पयेत्।**

**अयुताधिकसंख्यात्र जनता संप्रकीर्तिता।।**

**चित्रादिसदनोपेतं यामिकैरपि रक्षितम्।**

**प्रतिदेशमिदं स्थाप्यं जनानां बहुसौख्यदम्।।**[५५]

पत्तनस्य वास्तुभूमिस्तु प्रायः समुद्रतीरगता स्यात् वा पर्वतस्यासन्नभूमिगता स्यात्। अथ यत्र स्वादुतोयं सुलभ्यं सवैरपि सततं सुलभग्राह्यं तत्र स्थले पत्तनाख्यन्नगरमिदं कल्पयेत् इति। तत्र द्वारस्थलं तत्तद्दिग्देशगतेन महामार्गेण संयुक्तं कार्यम्। पत्तनस्य परितः परिखावृतं करणीयम्, किं च पत्तनस्य सर्वामपि वास्तुभूमिं द्वादशभागां विभज्य तत्रैव भागप्रमाणस्थले नृपमन्दिरं कल्पनीयम्। तादृशनृपमन्दिरन्तु तद्वास्तुभूमेर्मध्यगतं वा वारुणीदिशायां सपरिखश्च भवितव्यम्। तथा अवशिष्टेष्वेकादशभागेषु एकैकस्मिन्नपि भागे अष्टौ महावीथ्यः स्थाप्याः आहत्यात्र नगरे महावीथीनां संख्या अष्टाशीति। उपवीथ्याः, क्षुद्रवीथ्यश्च अनेकास्तत्तत्स्थलानुकूलं स्थापनीयम्। अपि चास्मिन् पत्तननगरे मण्डपसभाशालागोपुराद्यन्वितं बहुदेवतायतनं तत्र तत्र कार्यम्। काचित् पाठशाला, काचित् चित्रशाला, काचिद्वैद्यशालेति कल्पनीयाः। अयुताधिकजनसंख्यान्वितमेताद्दक्पत्तनाख्यन्नगरं

---

[54] विश्वकर्मवास्तुशास्त्रम् , अ.८.६०–६२

[55] विश्वकर्मवास्तुशास्त्रम् , अ.८.६३–६५

सकलजनसुखप्रदविविधकल्पनोपेतं प्रतिदिशं कल्पयेत् शिल्पकोविद् इति पत्तननगरस्य लक्षणम्।

शिल्परत्नग्रन्थेऽपि यथोक्तं पत्तनं **सागरानूपसंश्रितम्** तथा **सायन्त्रिकवणिग्जुष्टम्** इति दर्शितम्।[५६]

पत्तननगरस्य उदाहरणं कावेरीपत्तनं वा मुसलीपत्तनमादिनगराणां दातुं शक्यते। एतानि नगराणि समुद्रतटस्योपरि स्थितमासन् तथा एतेषां नाम्नः पत्तनमिति शब्दप्रयोगः भवति। वस्तुतः एतेषु नगरेषु अन्यदेशात् वस्तूनि आनीय, इतः वस्तूनां निर्यातं कुर्वन्ति स्म। स्थापत्यग्रन्थेषु पत्तनस्य परिभाषा यथा दृश्यते तथैव प्राचीनग्रन्थेषु एतेषां नगराणां व्यापारिकं वातावरणं दृश्यते।

**►द्रोणमुखनगरम् –**

द्रोणमुखनगरं नदीतटस्योपरि वा सरितां सङ्गमे स्थितमस्ति। अत्र व्यवसायिकानामावागमनं सर्वदा भवति। एतस्य स्थानस्योपरि जलमार्गः एवं स्थलमार्गः द्वयेन मार्गेण वस्तूनि आनेतुं शक्यन्ते। अतः एतस्य सम्बन्धः जलमार्गः एव स्थलमार्गः द्वयं मन्यते। एतेन द्रोणमुखनगरम् आपणकनगरं व्यापारिकनगरं प्रतितं भवति।

अर्थशास्त्रे द्रोणमुखस्य उल्लेखो प्राप्यते। यथा हि–

**चतुश्शतग्राम्या द्रोणमुखम्।**[५७]

एतस्यार्थः चतुर्शतं ग्रमाणां मुख्यकेन्द्रं (जनसन्निवेशः)अस्ति।

विश्वकर्मवास्तुशास्त्रम् इति ग्रन्थेऽपि द्रोणमुखनगरस्य वर्णनं प्राप्यते। यथा हि–

---

[56] शिल्परत्न, अ.५, पृ–१९

[57] कौटिलीय अर्थशास्त्रम् , (वाचस्पति गैरोला), अधिकरण–२,अ.१

**द्रोणकस्तु महीनेतुस्सदनेन विराजितः।**

**पूर्ववद्वप्रसंयुक्तो गोपुरेण समन्वितः।।**

**चतुर्दिक्स्थचतुर्द्वारोऽथवा द्वारद्वयान्वितः।**

**आरामैर्निष्कुटैश्चापि कुल्याभिरभिसंवृतः।।**[५८]

द्रोणकनगरे भूपालेच्छयानुसारं समीचीनस्थले राजभवनं निर्मापणीयम्। नगरे प्राच्यादिचतुर्दिक्षु सगोपुरं चतुर्द्वारं वा द्वारद्वयं स्थापनीयम्। नगरे आरामैर्निष्कुटैरित्यादीनामपि प्रकल्पनीयम्। अपि च नगरं परितो दुर्गनिर्माणं करणीयम्। नगरस्य मध्यभागे वारुणीदिशि शिवालयनिर्माणं कर्तव्यम्।[५९]

मानसारग्रन्थे **द्रोणान्तर** इति शब्दप्रयोगः प्राप्यते। यथा हि –

**समुद्रा(द्र) तटिनीयुक्तं तटिन्या दक्षिणोत्तरे।**

**वणिग्भिः सह नानाभिर्जनैर्युक्तं जनास्पदम्।।**

**नगरस्य प्रतितटे ग्राहकैश्च समावृत्तम्।**

**क्रयविक्रयसंयुक्तं द्रोणान्तरमुद्राह्दतम्।।**[६०]

ग्रन्थानुसारं नगरं समुद्रतटस्योपरि वा नद्याः दक्षिणोत्तरे वणिग्भिः सह अन्य विभिन्नर्भिजनैर्युक्तं परिपूर्णं भवति। नगरस्य प्रत्येक तटं ग्राहकैः समावृत्तमस्ति तथा नानाविध वस्तूनां क्रय–विक्रयः अपि अत्र भवन्ति।

मयमतम् इति ग्रन्थानुसारम् –

---

58 विश्वकर्मवास्तुशास्त्रम्, अ.८.५१–५२

59 विश्वकर्मवास्तुशास्त्रम्, अ.८.५५–५६

60 मानसार, अ.१०.३८–३९

**नद्यब्धिदक्षिणभाग्वणिगादिसंयुक्तम्।।**

**सर्वजनावासं यद् द्रोणमुखं प्रोक्तमाचार्यैः।**[६१]

एतत् नगरं नद्याः दक्षिणे एवं उत्तरे वा समुद्रतटे स्थितमस्ति। अत्रे विशेषतः वणिग्जनाः निवसन्ति तथा अन्य जनानां निवासा:अपि सन्ति।

अन्येषु ग्रन्थेषु द्रोणमुख स्थाने **द्रोणीमुख** इति शब्दप्रयोगः मिलति।

शिल्परत्नग्रन्थेऽपि एतावत् वर्णनं प्रप्यते। यथा हि –

**तदेवाब्धेश्च नद्याश्च संगमागतपोतकम्।**

**द्विपान्तरवणिग्जुष्टं विदुर्द्रोणीमुखं बुधाः।।**[६२]

एतस्य नगरस्य स्थानं नद्या तथा समुद्रसंगमागते दर्शितम्। एतत् विदेशी वणिग्जुष्टं समन्वितमस्ति। एतेन प्रकारेण एतत् नगरं बन्दरगाहः अपि कथितुं शक्यते।

► **पुटभेदनम् –**

प्राचीन भारते बृहद् व्यापारिकं केन्द्रं पुटभेदनम् इति नाम्ना ज्ञायते। यथा मिलिन्दपञ्हो ग्रन्थे साकलं पुटभेदनं कथितम्। तथोक्तम् –

**नानापुटभेदनं सागलं नाम नगरम्।**[६३]

एतेन प्रकारेण **पाटलिपुत्तं पुटभेदनम्।**[६४]

---

[61] मयमतम् , अ.१०.३२–३३

[62] शिल्परत्न,५,पृ–१९

[63] मिलिन्दपञ्हो, पृ–२

[64] दीधनिकाय.२, महापरिनिम्बानसुत, १५२, पृ–६९

अमरकोशेऽपि बृहन्नगरस्य कृते पुटभेदनं शब्दस्य प्रयोगः प्राप्यते। [६५] तथा पुटभेदनस्य व्याख्या –

**पुटानि पात्राणि भिद्यन्तेऽत्र पुटभेदनम्।** [६६] इति।

माघः अपि स्वस्य रचना शिशुपालवधे इन्द्रप्रस्थस्य पुटभेदनम् इति दर्शयति। [६७]

समराङ्गणसूत्रधारग्रन्थानुसारम् पुटभेदनस्य परिभाषा–

**बहुस्फीतवणिग्युक्तं तदुक्तं पुटभेदनम्।** [६८]

एतेन स्पष्टं भवति यत् पुटभेदननगरं अत्यन्तं विस्तृतमेवं वणिग्वर्गेण संयुक्तमासीत्।

**▶ निगमनगरम् –**

प्राचीनभारतीयग्रन्थेषु **निगम** इति शब्दप्रयोगः वेदानां, वैदिकग्रन्थानां, नीतिशास्त्राणां तथा व्यापारिक समितीनां कृते अभवत्। तेन सह नगरस्य कृते अपि अभवत्। अमरकोशे निगममेकप्रकारस्य नगरमस्ति इति दर्शितम्। यथा हि –

**पूः स्त्री पुरीनगर्यो वा पत्तनं पुटभेदनम्।**
**स्थानीयं निगमः अन्यत्तु यन्मूलनगरात्।।** [६९]

सार्थवाहानुसारं अत्र विशेषरूपेण क्रय–विक्रयोः कार्यं सम्पन्नं भवति स्म। एतेन स्पष्टं भवति यत् एतत् नगरं वणिजां नगरमासीत्। [७०]

---

[65] अमरकोश, काण्ड –२, पृ–११६

[66] अमरकोश (सत्यदेव मिश्र सम्पादित), पृ–१२६

[67] शिशुपालवध, सर्ग–१३.१६

[68] समराङ्गणसूत्रधारः, अ.१८.५

[69] अमरकोश, काण्ड–२, पुरवर्ग–१

विश्वकर्मवास्तुशास्त्रग्रन्थानुसारं निगमसंज्ञकं नगरं वनमध्ये वा गिरिपार्श्वे भवितव्यम्। निगमनगरं समन्ततः पुररक्षकैः परिरक्षितो भवितव्यम्। दुर्गेण वप्रेणापि संयुक्तमत्रापि प्राच्यादिषु चर्तुदिक्षु महामार्गान्वितं द्वारचतुष्कं सोपपीठं निर्मापणीयम्। तादृशद्वारेषु चतुर्ष्वपि भूमौ प्रथमतः पीठस्तदुपर्यधिष्ठानन्तदुपरि गमनागमनयोग्यं महाद्वारं तदुपरि पञ्चतलोपेतं त्रितलोपेतं वा गोपुरश्च निर्मापणीयम्। सङ्ग्रहेण सद्वज्रस्तावत्पृथुद्वारेषु सन्धिबन्धनार्गलादि करणीयम्। तेनोपेतं महाद्वारमिति अस्मिन्नगरे प्राचीदिगारब्धाः प्रतीचीगामिन्यः प्रतोलिकाश्चत्वारिंशत् संख्यकाः स्थापनीयम्।

अपि चास्य निगमनगरस्य मध्यवास्तुभागे एवात्युन्नतं भूपालमन्दिरं निर्मितव्यम्। राजकार्यकरैः पुरकार्यकरैश्च बहुभिरावृते निपण्यादित्यादिः स्पष्टार्थक एवेति निगमनगरलक्षणं भवति।

समराङ्गणसूत्रधारग्रन्थानुसारम् –

**उनं कर्वटमेवेह गुणैर्निर्गम उच्यते।**[७१]

गुण दृष्ट्या किञ्चित न्यून कर्वटस्य निगमं ज्ञायते।

अन्येषु शिल्पशास्त्रेषु तस्य रचना वैशिष्ट्यं तत्र निवासितानां जानानां दृष्ट्या चित्रितमासीत्। मानसारे अपि च –

**द्विजातिचतुर्वर्णैर्वर्णान्तरजनैर्वृतम्।**

**बहुकर्मकरैर्युक्तं निगमं तदुदाहृतम्।।**[७२]

---

[70] सार्थवाह, पृ–१६३

[71] समराङ्गणसूत्रधारः, अ.१८.३

[72] मानसार,अ.१०.४२

द्विजादिचतुर्वर्णानां तथा अन्य विविधजनानामेवं शिल्पीनां परिपूर्णं निगमं दर्शितम्। एतावत् मयमतम् इति ग्रन्थेऽपि –

**चातुर्वर्ण्यसमेतं सर्वजनावाससङ्कीर्णम् ।**

**बहुकर्मकारयुक्तं यन्निगमं तत् समुद्दिष्टम्।।**[७३]

यथा चतुर्वर्णानां युक्तमेवमन्यबहुकर्मकारयुक्तं तथा बहुसंख्यकशिल्पिनां युक्तं नगरं निगममिति उच्यते।

शिल्परत्नग्रन्थे एतत् स्पष्टमस्ति यत् –

**चातुर्वर्ण्यैः कर्मकारैर्नानाकर्मोपजीविभिः।**

**पण्यश्चधनधान्याद्यैर्युक्तं तु निगमं स्मृतम्।।**[७४]

निगमं चतुर्वर्ण्यैः, एवं शिल्पयः तथा विभिन्नकर्मोपजीविभिः संयुक्तमस्ति तथा एतत् नगरं क्रय–विक्रयस्य धन–धान्यादिनां सङ्कीर्णमस्ति। अनेन प्रकारेण अत्र सर्वप्रकारानां जानः निवसन्ति, परन्तु शिल्पिनां प्राधान्यं भवन्ति। एतत् प्रकारेण प्राचीन ग्रन्थानामनुशीलने स्पष्टं भवति यत् व्यावसायिकानां निवासनानि कदाचित् भिन्नमपि भवन्ति।

जातकसाहित्ये वाराणसीसमीपे एतावत् बृहद् जनावासः स्थितमासीत्, तत्र **महावड्ढकिगामो** इति अर्थात् एकसहस्त्रं बढई जनाः निवसन्ति स्म इति वर्णनं प्राप्यते।[७५]

एतावत् जनावासानामाविर्भावः व्यवसायिक केन्द्रीकरणार्थं कदाचित् जातम्। वास्तुशास्त्रीयग्रन्थेषु उपलब्धनिगमशब्दस्य अभिप्रायः शिल्पिनां निवासाः इति भवन्ति

---

[73] मयमतम्, अ.१०.३४–३५

[74] शिल्परत्न, अ.५.३३

[75] जातक, ४.१५१

कदाचित्। अनन्तरं नगरस्य रूपेण आविर्भावः जातः। नगरस्य संज्ञा निगममिति तस्य सूचकः अस्ति।

### ► स्थानीयनगरम्

कौटिलीयअर्थशास्त्रानुसारं स्थानीय शब्दस्यार्थः –

**अष्टाशतग्राम्या मध्ये स्थानीयम् ।**[७६] इति, अर्थात् अष्टाशत ग्रामाणां मध्ये स्थितं नगरम् इति स्थानीयम्। अमरकोशेऽपि यथोक्तम् –

**तिष्ठन्त्यस्मिन्नित्यष्टशतग्राममध्ये स्थानीयम्।**[७७]

अर्थशास्त्रमेवम् अमरकोशानुसारेण अष्टशतग्रमाणां किमपि बृहद् राजनैतिकं केन्द्रमिति कथयितुं शक्यते। तथा –

**स्थानीयेषु व्यावहारिकानर्थान् कुर्युः।**[७८]

तत्र न्यायाधीशाः व्यावहारिककार्यं कुर्वन्ति स्म।

मानसारग्रन्थानुसारम्–

**नदीपार्श्वाद्रिसंयुक्तं भूपालालयसंमि(संयु)तम्।।**
**बहुरक्षसमायुक्तं नित्यं सन्नृपसंयुतम्।**
**स्थानीयं सर्वद्विद्भिः प्रोक्तं गहुसुखावम्।।**[७९]

---

[76] कौटिलीय अर्थशास्त्रम्(वाचस्पति गैरोला), अधिकरण–२, अ.१

[77] अमरकोश (हरिदत्त शर्मा सम्पादित), पृ–७४,प्राचीन भारत में नगर–जीवन, पृ–३७ उद्धृत।

[78] कौटिलीयअर्थशास्त्रम्(वाचस्पति गैरोला), अधिकरण–३, अ.१,पृ–३१३

[79] मानसार, अ.१०.३६–३७

यथा स्थानीयनगरं नदीपार्श्वे वा गिरिपार्श्वे स्थितमस्ति। नृपेण स्थापितमस्ति, अत्र राजभवनं तथा बहुरक्षा समायुक्तमस्ति। अत्र निवासिनः जनाः सुरक्षिताः एवं बहुसुखावहाः भवन्ति।

मयमतम् इति ग्रन्थेऽपि मानसारानुसारं स्थनीयनगरविषयकवर्णनं दृश्यते। यथा हि –

**नद्यद्रिपार्श्वयुक्तं नृपभवनयुतं सबहुरक्षम्।।**

**यन्नृपतिस्थानपितकं तत् स्थानीयं समुद्दिष्टम्।**[८०]

एषामपि नदीतीरे वा पर्वतसमीपे, राजभवनयुक्तं, सबहुरक्षमेवं नृपतिस्थापितमिति दर्शितम्।

शिल्परत्नग्रन्थेऽपि स्थानीयस्य लक्षणोल्लेखप्रसङ्गे उपरोक्तवर्णनानुसारं दृश्यते। अत्र अपि नदीतटे वा पर्वतस्य पार्श्वे स्थानीयस्य स्थानं दर्शितम्। यथा हि–

**पर्वतस्याथवा नद्याः पार्श्वे राजबलान्वितम्।।**

**राष्ट्रस्यान्तकपालाय तत्स्थानीयं विदुर्बुधाः।**[८१]

स्थानीयनगरसम्बन्धितं डॉ. शुक्लस्य मतानुसारं प्राचीनकाले यदा आधुनिक साधनानि उपलब्धानि न सन्ति तदा तस्याभावेन राजसत्ता एवं राज–व्यवस्थायाः समुचितेन संचालनेन आवश्यकतानुसारेण राजानः स्व–स्व स्थानीयं (हेड–क्वाटर) स्थापयन्ति स्म। अतः एव कालान्तरे एतत् नगरस्य संज्ञा स्थानीयनगरमिति अभवत्। अनन्तरं स्थानीयनगरेषु सुरक्षाहेतुः एवं करग्रहणार्थं नृपेण उच्च राज्याधिकारिणः निवासं कुर्वन्ति स्म।[८२] एतत् सम्बन्धितं शिल्परत्नग्रन्थे उल्लेखितं **राष्ट्रस्थान्तकपालाय** शब्दस्याधारे स्थानीय शब्दः कालान्तरे

---

[80] मयमतम् , अ.१०.३१–३२

[81] शिल्परत्न, अ.५,पृ–२०

[82] भारतीयवास्तुशास्त्रम्, वास्तुविद्या तथा पुरनिवेश, पृ–१०७

नगरस्य स्थाने **आरक्षकाणां स्थानं (पोलीस-चौकी)** इति अर्थे प्रयुक्तं भवति स्म, अर्थात् अत्र सीमारक्षा सम्बन्धित प्रमुखः निवासं करोति स्म।[८३]

**► खर्वटः (कर्वटः) –**

कौटिलीय अर्थशास्त्रानुसारम् –

**द्विशतं ग्राम्या खर्वटिकम्।**[८४]

द्विशतं ग्रामाणां मध्ये प्रधानमधिष्ठानं वर्तते। अतः सम्भवतः एषः जनसन्निवेशस्य प्रधान भागः भवति स्म तथा ग्रामाणां रक्षणार्थं दुर्गस्वरूपे निविष्टं भवति स्म। अमरकोशे –

**खर्वटं नाम नदीगिरिसमाश्रयम्।**[८५] इति दर्शितम्।

आचार्य वास्त्यायनस्य कथानुसारं खर्वटे सभ्यजनाः निवासनं कुर्वन्ति स्म।[८६]

समराङ्गणसूत्रधारग्रन्थे राजाभोजः खर्वटशब्दस्य स्थाने कर्वटशब्दस्य प्रयोगं कृत्वा शाखानगरं एव कर्वटम् इति दर्शयति, एतत् नगरसदृशमेव भवति। यथा हि –

**शाखानगरमेवाहुः कर्वटं नगरोपम्।**[८७]

विश्वकर्मवास्तुशास्त्रम् इति ग्रन्थानुसारमपि –

**वास्तुभूमिः खर्वटस्य नदीतीरगता मता।**

**रसालसालवकुलैस्तिन्त्रिणीवेणुपाटलैः।।**

---

[83] प्राचीन भारत में नगर तथा नगर–जीवन, पृ–३८

[84] कौटिलीय अर्थशास्त्रम् , अधिकरण–२,अ.१,पृ–९३

[85] अमरकोश(सत्यदेव मिश्र), पृ–५५०

[86] कामसूत्र, सूत्र–२,पृ–६६

[87] समराङ्गणसूत्रधारः, अ.८.३

**कदम्बैर्नारिकेलैश्च श्रीपर्णैस्तिलकैरपि।**

**छायावृक्षसमाकीर्णा निष्कुटारामसंवृता।।**

**दशादिविंशद्वीथीभिरावृता च समन्ततः।**

**शतगेहा मुख्यवीथी तन्मध्ये कालिकागृहम्।।**

**वागुराजीविभिश्चान्यैर्मृतकैश्च कृषीवलैः।**

**मदिरागेहसंयुक्ता विपण्यादिभिरावृता।।**[८८]

खर्वटवास्तुभूमिस्तावत्प्रायशः नदीतीरगतैव स्यात्। रसालादि छायावृक्षसमूहभरिता, निष्कुटोपेता वा आरामसंवृता भवेत्। किञ्चात्र दशादिविंशद् वीथ्यस्समन्ततस्तत्र स्थलानुकूल्येन क्षुद्रवीथ्युपेताः अपि कार्याः। तासु वीथीषु शतगेहभासुरा एका मुख्यवीथी अतिदीर्घा निर्मापणीया। तस्या एव मुख्यवीथ्या मध्ये कालिकागृहं स्थापनीयम्। अपि चायं खर्वटः वागुराजीविभिर्भृतकैरन्यैश्च कृषीबलैश्च समाकीर्णश्च भवति। अपि चेयं खर्वटः स्तावन्मदिरागृहोपेता क्षुद्रविपण्यादिसहिता चेति भवति।

मानसारग्रन्थानुसारं खर्वटं प्रायः पर्वतेन परिवेष्टितं तथा नानजातिगृहैर्वृतमवं सर्वप्रचारसंयुक्तं खर्वटं ज्ञायते। यथा हि–

**परितः पर्वतैर्युक्तं नानाजातिगृहैर्वृतम्।**

**सर्वप्रचारसंयुक्तमेतत्खर्वटमीरितम्।।**[८९]

मयमतमे अपि एतावत् समानमेव परिभाषा वर्तते। यथा हि–

**परितः पर्वतयुक्तं खर्वटं सर्वजनसहितम्।**[९०]

---

[88] विश्वकर्मवास्तुशास्त्रम् , अ.८.२२–२५

[89] मानसार, अ.१०.३०

एतादृशा वास्तुशास्त्रीयग्रन्थेषु उपलब्धस्य खर्वटस्य लक्षणेन स्पष्टं भवति यत् एतत् नगरं पर्वतप्रदेशस्योपरि स्थितमस्ति वा तस्य चतुर्दिक् परितो पर्वताः सन्ति। एते सुरक्षा दृष्ट्या प्राकारस्य भूमिकां करोति। सम्भवतः एतत् कारणात् खर्वटं सर्वजनानां निवास हेतुः उपयुक्तं मन्यन्ते।

**▶खेटं वा खेटकम् –**

समराङ्गणसूत्रधारग्रन्थे राजा भोजः खेटस्य सम्बन्धितं निर्दिशयति–

**खेटं तदर्धविष्कम्भमाहुग्रामं तदर्धतः।।**[९१]

खेटस्य विस्तारः नगरस्य अर्धं तथा खेटस्य अर्धं ग्राममिति। अर्थात् खेटं नगरात् लघु एवं ग्रामात् बृहद् अस्ति। एतस्य निवेशः नगरात् योजनमानेन दूरं भवति।

**योजनेन पुरात् खेटम् ............।**[९२]

खेटं वा खेटकं लघु नगरमस्ति। विश्वकर्मवास्तुशास्त्रे एतस्य गणना ग्रामस्यन्तर्गतं वर्तते। यथा हि –

**खेटस्य वास्तुभूमिस्तु प्रायः काननमध्यगाः।**
**शबरैश्च पुलिन्दैश्च संयुता मांसजीविभिः।।**
**पर्णगेहान्विता विष्वगथ वेष्टिकगेहभाक्।**
**एकादिदशवीथ्यन्ताः क्षुद्रवीथ्यस्समन्ततः।।**[९३]

---

[90] मयमतम् , अ.१०.२७

[91] समराङ्गणसूत्रधारः, अ.८.७९

[92] समराङ्गणसूत्रधारः, अ.८.८०

[93] विश्वकर्मवास्तुशास्त्रम् , अ.८.२०–२१

खेटस्य वास्तुभूमिः प्रायशोऽरण्यमध्यभाक्कथिता। एकवीथीप्रभृति दशवीथ्यन्तास्वस्थाप्याः। क्षुद्रवीथ्यादयस्तु तत्र तत्र स्थलानुकूल्येन बहवः। प्रायशः पर्णादिरचितपटलवद्भिरेव गृहैः कचिदिष्टिका निर्मितगृहोपेता कार्या च बहुविधमांसविक्रयशीलैः स्वयमपि मांसेन जीविभिश्शबरैः पुलिन्दैर्जनैर्नीचैरावृता च भवेत्। एतादृशा लक्षणान्वित खेटग्राम इति संज्ञेति प्रख्यातः।

शिल्परत्नग्रन्थे **ग्रामयोः खेटकं मध्ये.............।**

अतः ग्रामाणां मध्ये स्थितकारणात् खेटे ग्रामतत्त्वस्य सम्मिश्रणमपि दृश्यते।

मानसारग्रन्थे खेटस्य चित्रम् –

**नदीपर्वत(त्) प्रान्ते (च) शूद्रालमन्वितम्।**

**महाप्रावृतसंयुक्तं खेटमुक्तं पुरातनैः।।** [९४]

खेटः नदी एवं पर्वत–प्रान्ते स्थितं वा एतस्य परितो पर्वताः स्थिताः इव खेटस्य स्थानं भवेत् तथा शूद्रालयसमन्वितं भवति।

मयमतग्रन्थेऽपि यथोक्तं वर्णनं प्राप्यते। यथा हि –

**शूद्रैरधिष्ठितं यत्रद्यचलावेष्टितं तु तत्खेटम्।।** [९५]

एतावत्खेटस्य स्थानं सरितस्तटे वा पर्वतप्रदेशयुक्तं वन–प्रदेशे भवेत्। नगरनिवासिनांरूपेण शूद्राणामाधिपत्यं वर्तते। सम्भवतः आचार्य पाणिनिः एतत् नगरं – **चेलखेटकटुककाण्टं गर्हायाम्।** [९६] अर्थात् गर्हितनगरं कथयति। कोशकारः अमरसिहः अपि

---

[94] मानसार, अ.१०.२९

[95] मयमतम् , अ.१०.२६

[96] अष्टाध्यायी, ६.२.१२५

खेटस्य वा खेटकस्य गर्हित तथा अवद्यनगरम  उच्यति। हिन्दी आदि भाषायां **खेडा** शब्द खेटतः निष्पन्नः। अधुनापि मध्यप्रदेशतः पश्चिमगुजरातपर्यन्तमेतस्य पदस्य प्रयोगः भवति। गुजराते चरोतरप्रदेशे आणन्दनगरस्य समीपे खेडानामकं नगरम् अधुना अपि वर्तते।

**२.ग्रामप्रकाराः –**

विश्वकर्मवास्तुशास्त्रम् इति ग्रन्थे अन्य द्वादशग्रामाणां लक्षणानां वर्णनमपि लभ्यते। यथा हि–

**आद्यस्तु मण्डकग्रामः प्रस्तरस्तदनन्तरम्।**
**बाहुलीकस्तृतीयस्तु पराकस्तु चतुर्थकः।।**
**चतुर्मुखः पञ्चमः स्यात् षष्ठः पूर्वमुखस्तथा।**
**सप्तमो मङ्गलग्रामस्त्वष्टमो विश्वकर्मकः।।**
**नवमो देवराड्ग्रामो विश्वेशो दशमो मतः।**
**एकादशस्तु कैलासो द्वादशो नित्यमङ्गलः।।**
**इत्येवं द्वादश ग्रामाः शिल्पशास्त्रे प्रकीर्तिताः।**[९७]

यथा (१) मण्डकग्रामम् (२) प्रस्तरग्रामम् (३) बाहुलिकग्रामम् (४) पराकग्रामम् (५) चतुर्मुखग्रामम् (६) पूर्वमुखग्रामम् (७) मङ्गलग्रामम् (८) विश्वकर्मग्रामम् (९)

[97] विश्वकर्मवास्तुशास्त्रम् , अ.७.६–९

देवेशग्रामम् (१०) विश्वेशग्रामम् (११) कैलासग्रामम् (१२) नित्यमङ्गलग्रामम् इति द्वादशग्रामाणां लक्षणमपि विस्तृतरुपेण प्रतिपादितमस्ति।

**▶ मण्डकग्रामम् –**

यत्र नगरग्रामनिर्माणार्थं शुभवास्तुषु यत्र स्थले पूर्वदिशायां मुख्यवीथी प्रतीचीं दिशं गाहते, यत्र पश्चिमदिशायां शिवस्य विष्णोर्वा मन्दिरं निर्मीयते, तादृश मन्दिरं तां च मुख्यवीथीमावृत्य कुबेरेन्द्रयमदिग्गभाजस्तिस्रोऽन्या विपुलाः मार्गाः वर्तन्ते। यत्र च इतरजनसंख्या अपेक्षया विप्राणामेवाधिकं संख्या भवन्ति। तं ग्रामं मण्डकग्रामं कथ्यते।

**▶ प्रस्तरग्रामम्** –

यत्र द्वितीयप्रस्तरग्रामे प्राचीं दिशमारभ्य वरुणदिग्गामिन्यश्चतस्रो वीथ्यस्तथैव दक्षिणदिशामारभ्योदीचीदिग्ाभिन्यः चतस्राः मार्गाः वर्तन्ते।

अस्मिन् ग्रामे सर्वाः मार्गाः परस्परं सम्मुखगृहान्विताः कार्याः। किञ्चात्र सर्वत्र वीथीषु मध्यगामिनी वा तिर्यग्वीथी तस्या एव मध्यवीथीति व्यवहारे ज्ञायते। ग्रामस्यास्य मध्यभागे एव शिवस्य मन्दिरनिर्माणं कुर्यात्। क्वचित् ग्रामस्य परितो लधुपरिखां वा परिखाकारवीथीमपि कारयेत्। अपि च ऐन्द्रयामेव दिशायामस्य ग्रामस्य मुख्यमार्गकल्पनीयम्। अस्यै पूर्वदिशायां मुख्यमार्ग एक एव अन्यत्र न इति भावः। पूर्वद्वारसमोपेतं प्रत्यग्भागे वापीतटाकादिजलाशयं कार्या।[९८] तथा तत्र –

**विपणिश्चाप्यथैशान्यां बहुवस्तुसमावृता।**

**विप्रैरधिकसंसख्याकैस्स युक्तः प्रस्तरो मतः।।**[९९]

---

[98] विश्वकर्मवास्तुशास्त्रम् , अ.७.१२–१४

[99] विश्वकर्मवास्तुशास्त्रम् , अ.७.१५

अस्मिन् प्रस्तरग्रामे बहुवस्तुयुक्त ऐशान्ये विपणि अपि स्थाप्या। किञ्चेतरजनगृहापेक्षया विप्रजातिगृहाधिक्यमेवं वर्तन्ते। सोऽयं ग्रामो प्रस्तरग्रामम् इति नाम्ना विख्यातम्।

**►बाहुलिकग्रामम्** –

अथ तृतीयस्य बाहुलिकग्रामे यत्र प्राचीदिगारब्धाः विपुलाः पञ्च वीथ्यः प्रतीचीं दिशं भजन्ति। किञ्चात्र ग्रामस्य मुख्यद्वारं प्रतिच्यामपि कार्यम्। ग्रामोऽयं लधुवप्रेण संवृतो भवति। ग्रामस्य मध्यभागे शिवालयस्य निर्माणं कुर्यात्। ग्रामस्य याम्यां सरांशयादि जलाशयं स्थापनीयम्। ग्रामे यथेष्टस्थले बहुवस्तुसमृद्धविपणिमन्याञ्च सौकर्यकारिणीं शालां स्थापयेत्।[१००] तथा किञ्चात्र ग्रामे बहुजातिकुलश्च ग्रामपालालयमपि स्थाप्या। ग्रामस्य परितः सस्ययोग्यभूमिसमायुक्तो अपि भवति। यथा हि –

**नानाजातिभिराकीर्णो ग्रामपालालयान्वितः।**

सस्यभूमिसमायुक्तो ग्रामो बाहुलिकः स्मृतः।।[१०१]

एतावत् लक्षणयुक्तं ग्रामं बाहुलिकग्राममिति निगद्यते।

**►पराकग्रामम्** -

चतुर्थं पराकग्रामे एका मुख्यवीथी अतिदीर्धा वर्तते। उत्तरस्यां दिशि शिवालयम्, प्रादक्षिण्यक्रमेणावृता चतुरश्रा वा वर्तुला वीथी क्रियते। अस्मिन् ग्रामे विप्राणां संख्या हीना सन्ति। अन्येषां संख्याधिक्यमाहतिक्रमेण किञ्चित् न्यूनाधिक सहस्त्रजनाः गण्येत। यत्र अपि

---

[100] विश्वकर्मवास्तुशास्त्रम् , अ.७. १६–१७

[101] विश्वकर्मवास्तुशास्त्रम् , अ.७.१८

दक्षिणस्यां दिशि जलाशयः, पश्चिमद्वारसंयुक्तश्च कार्या। ग्रामस्य परितो परिखायाः निर्माणमपि करणीयम्।[१०२]

एवम् –

**याम्यभाग्विपणिश्चैव शालीसस्यरसान्वितः।**

**सोऽयं ग्रामश्शास्त्रविद्भिः पराक इति कीर्त्यते।।**[१०३]

किञ्च याम्यां क्षुद्रविपण्याद्युपेतः। प्रायशोऽयं ग्रामस्सस्यभूमिपरिवृतश्च भवतीत्यादिलक्षणं यत्र सम्भवति सोऽयं ग्रामं पराकग्राममिति ज्ञायते।

**►चतुर्मुखग्रामम्** –

अत्र चतुर्मुखग्रामे प्राच्यादिषु चतसृषु दिक्षु द्वारचतुष्कं स्थाप्यते। ग्रामस्य मध्यभागे देवतायतनं निर्मापयते, तदायतनं परितश्चतसृष्वपि दिक्षु पञ्च मार्गाः कल्पनीयम् अर्थात् चाहतिक्रमे विंशतिवीथीकायुतं ग्रामं भवेत्। अथवा प्रतिदिशं द्वादशवीथीकायुतो वा कल्प्यते। तदात्वेऽष्टचत्वारिंशद्वीथीकायुतं ग्रामं भवति। यथैक लधुवप्रेण संयुक्तो तथा नानाजातिजनान्वितः अपि क्रियते तदा चतुर्मुखग्रामं कथ्यते। अत्र ऐन्द्र्यामपि च वारुण्यां वाप्यादिजलाशययुक्तं कार्या। दक्षिणदिशायां विपणिः, तत्रैव च ग्रामपालकावासः निर्मितव्यम्।[१०४] तथा तत्रेव अन्य –

**भूपालाज्ञाकरी शाला कौबैर्या कल्पिता यदि।**

---

[102] विश्वकर्मवास्तुशास्त्रम् , अ.७.१९–२०

[103] विश्वकर्मवास्तुशास्त्रम् , अ.७.२१

[104] विश्वकर्मवास्तुशास्त्रम् , अ.७.२२–२३

**सोऽयं ग्रामश्शास्त्रविद्भिश्चतुर्मुख इतीरितः।।** [105]

तत्समसूत्रे प्राच्यां भूपालाज्ञाकारी शाला अर्थात् तावत् न्यायशाला निर्मापयेत्। इत्येवं ग्रामं चतुर्मुखग्रामं ख्यातम्।

**►पूर्वमुखग्रामम् –**

**प्राच्यां मुखद्वारयुतः परिखावृतवास्तुकः।**

**वैश्यसंख्याधिक्ययुतः पण्यवीथीभिराकुलः।।** [106]

यत्र पूर्वदिशायां मुख्द्वारं क्रियते। कश्चि यत्रस्थले ग्रामस्य परितो परिखायाः निर्माणमपि क्रियते, पुरद्वारयुक्तं तादृशोऽयं ग्रामः पूर्वमुख इति वास्तुविद्वजनैः उच्यते। किञ्चायं ग्रामो नानाजातिजनावासभाक् च भवति। राजवेश्मसमन्वितः अपि भवति। अस्मिन् ग्रामे उदीच्यामथ वारुण्यां वा दिशि देवतायतनं स्थाप्यम्। तत्र तत्र तटाकवाप्यादिजलोपेता त्रिंशद्वीथीभिरावृतः कार्या तथा उपवीथी निमार्णमैच्छिकमस्ति। क्वचित् अस्मिन् ग्रामे कुलालाम्बरजकादिभिः यथास्थाने तत्र तत्र गृहनिर्माणश्च कार्यम्। एतावत् लक्षणयुक्तं ग्रामं पूर्वमुखग्रामं विख्यातम्।

एतादृशा मयमतम् इति ग्रन्थेऽपि ग्रामभेदाः मयऋषिः दर्शयति। यथा –

**दण्डकमपरं स्वस्तिकमित ऊर्ध्वं प्रस्तरं चैव।।**

**पश्चात् प्रकीर्णकं स्यान्नन्द्यावर्तं परागमथ पद्मम्।**

**श्याच्छ्रीप्रतिष्ठितेतैवाष्टविधं ग्राममुद्दिष्टम्।।** [107]

---

105 विश्वकर्मवास्तुशास्त्रम् , अ.७.२४

106 विश्वकर्मवास्तुशास्त्रम् , अ.७.२५

107 मयमतम्, अ.९.३४

मयमतमनुसारं ग्रामस्य अष्टप्रकाराः वर्तन्ते। यथा – दण्डकं, स्वस्तिकं, प्रस्तरं, प्रकीर्णकं, नन्द्यावर्तं, परागं, पद्मं चैव श्रीप्रतिष्ठितम्। उपरोक्तग्रामभेदानां निर्माणविधानमपि विस्तृतरूपेण मयमतग्रन्थे विद्यते।

**►दण्डकग्रामम् –**

**प्रागुदगग्रं मार्गं ककनीकृतदण्डवत्तु तन्मध्ये।।**

**द्वारचतुष्टययिक्तं दण्डकमिति भण्यते मुनिभिः।**

**दण्डवदेका वीथी साप्येवं दण्डकं प्रोक्तम्।।** [१०८]

पूर्वमेवमुत्तरदिशि ककनीकृतदण्डवत्तु मार्गं स्थितमस्ति एवं चतुर्द्वारयुक्तं ग्रामं दण्डकग्रामम् इति मुनिभिः कथ्यते।

**►स्वस्तिकग्रामम्** –

स्वस्तिकग्रामे नवपदयुक्तं, परितो पदस्य बहिः मार्गयुक्तमस्ति। तस्मात् याम्यात् प्रारभ्य प्रागुदगग्रात् प्राग्वीथी स्थितमस्ति। तस्मात् दक्षिणवीथी प्राग्दक्षिणतो प्रतीचिमुखा तथा दक्षिणतः पश्चिमपरतः उत्तरपर्यन्तं वीथी युक्तमस्ति। प्राचीमुखा अपरोत्तरवीथीयुक्तं ग्रामं स्वस्तिकग्रामं प्रख्यातम्। स्वस्त्याकृत्या चतुर्मार्गं युक्तं ग्राममस्ति।[१०९]

**►प्रस्तरग्रामम् –**

---

108 मयमतम्, अ.९.४१–४२

109 मयमतम्, अ.९.४३–४५

प्रस्तरग्रामं पञ्चधा प्रवर्तते। अत्र प्राचीतः पश्चिमपर्यन्तं मार्गत्रयम् स्थिताः वर्तन्ते एवमुत्तरतः स्त्रिभिश्चतुर्भिरथो पञ्चभिरपि षट्सप्तभिरपि युक्तं प्रस्तरग्राममुच्यते।[११०]

**►प्रकीर्णकग्रामम्** –

प्रकीर्णग्रामस्यापि पञ्चभेदाः वर्तन्ते। एतेषां प्रागग्रैस्तु पश्चिमपर्यन्तं चत्वारः मार्गाः सन्ति। उत्तरतः द्वादशः, एकादशः, दशः वा नवः वा अष्टमार्गाः स्थिताः सन्ति।[१११]

**►नन्द्यावर्तग्रामम्** –

नन्द्यावर्तग्रामं प्राक्प्रत्यग्गतमार्गैः पञ्चभिः युक्तमस्ति तथा उत्तरे त्रयोदशभिः, एकविंशतिभिरथ पञ्चादशभिः षोडशभिः सप्तदशभिरपि मार्गैः शोभितं ग्रामं नन्द्यावर्तग्राममिति नाम्ना विख्यातम्।[११२] तथा –

**युक्तं नन्द्यावर्तं दिक्षु चतुर्द्वारसयुक्तम्।**

**नन्द्यावर्ताकृत्या बाह्ये द्वारैरबाह्यतो मार्गैः।।**[११३]

अर्थात् नन्द्यावर्तग्रामं चतुर्दिक्षु चतुर्द्वाराणि संयुक्तमस्ति। नन्द्यावर्ताकृत्या कारणात् एतत् ग्रामं नन्द्यावर्तग्रामिति नाम्ना ज्ञायते।

**►परागग्रामम्** –

**आद्यैरष्टादशाभिर्द्वाविंशत्यङ्कैरुदग्वक्त्रैः।।**

**षड्भिः प्राङ्मुखमार्गैर्युक्तं ह्येतत् परागमिति कथितम्।**[११४]

---

110 मयमतम्, अ.९.४६

111 मयमतम्, अ.९.४७

112 मयमतम्, अ.९.४८

113 मयमतम्, अ.९.४९

परागग्रामे आद्यैः अष्टादशतः द्वाविंशति पर्यन्तं मार्गाः उत्तरतः गच्छन्ति। पूर्वतः षड्भिः मार्गैयुक्तं ग्रामं परागग्रामिति कथ्यते।

►**पद्मग्रामम्** –

**प्राक्प्रत्यग्गतमार्गैः सप्तभिरुदगग्रैस्त्रिवेदशरैः।।**

**षट्सप्तभिरपि युक्तैर्विंशतिभिः पञ्चधा पद्मम्।**[११५]

पद्मग्रामे पूर्वतः पश्चिमपर्यन्तं सप्तमार्गाः स्थिताः सन्ति एवं उत्तरतः त्रि,चत्वारि, पञ्चभिः मार्गैः युक्तमस्ति। षट्सप्तभिरपि संयोजने विंशतिमार्गाः भवन्ति। एतावत् लक्षणयुक्तं ग्रामं पद्मग्राममिति प्रख्यातम्।

►**श्रीप्रतिष्ठितग्रामम्** –

**अष्टभिरथ पूर्वाग्रैरुदगग्रैः साष्टचिंशतिभिः।।**

**आद्यैर्द्विः षोडशभिमार्गैरन्त्यैर्युतं यत्तु।**

**तच्छ्रीप्रतिष्ठितं स्यादष्टविधं ग्राममुद्दिष्टम्।।**[११६]

श्रीप्रतिष्ठितग्रामे पूर्वतः अष्टमार्गाः तथा उत्तरतः अष्टविंशतितः आरभ्य द्वात्रिंशतमार्गाः स्थिताः सन्ति। एतत् ग्रामं श्रीप्रतिष्ठितग्रामं विख्यातम्।

---

114 मयमतम्, अ.९.५०–५१

115 मयमतम्, अ.९.५१–५२

116 मयमतम्, अ.९.५२–५३

यथोक्तं मयमुनि:मयमतग्रन्थे अष्टविधं ग्राममुद्दिष्टम्। तथा **श्रीवत्सादिकमुपनेतव्यं तु विन्यासम्।**[११७] इति अपि मयऋषि: कथयति।




117 मयमतम्, अ.९.५४

नन्द्यावर्त (वर्तुल)



नन्द्यावर्त (चतुरश्र)



प्रस्तर






खेट संज्ञक ग्राम



कुण्डक ग्राम रचना

# ग्राम्य रचना स्वरूप




खर्वट संज्ञक ग्राम

कार्मुक



# पुर अथवा ग्राम-नगर के रेखा-चित्र



स्वास्तिक ग्राम की रचना



पद्मक





# नद्यावर्तग्रामरचना



पद्मकग्रामरचना